# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१) (New)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.C.4.1.3** | समयः- 8 तः 11 पर्यन्तम् |

दिनाङ्कः –12/10/2019 सन्दर्भग्रन्थः – लघुशब्देन्दुशेखरः (पञ्चसन्धिप्रकरणम्)

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ कस्याप्येकस्य प्रश्नस्य उत्तरं देयम्।** ५

१ माहेश्वरसूत्रेषु यथाप्राप्तं सन्धिकार्यं कथं न भवति? यथाग्रन्थं लेखनीयम्।

२ 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**प्रश्न २ कस्याप्येकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ 'लण्' सूत्रस्थाकारः अनुनासिकाननुनासिको वा? स्वाधीतग्रन्थदिशा विवेचनीयः।

२ 'पूर्वत्राऽसिद्धम्' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नलिखितयोरेकस्य सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या।** ५

१ अचश्च

२ नादिन्याक्रोशे पुत्रस्य

**प्रश्न ४ कस्याप्येकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ 'मिदचोऽन्त्यात्परः' सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या।

२ 'अचः परस्मिन् पूर्वविधौ' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ निम्नलिखितयोरेकस्य सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या।** ५

१ न पदान्ताट्टोरनाम्

२ नश्च

**प्रश्न ६ कस्याप्येकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ 'यथासंख्यमनुदेशः समानाम्' सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या।

२ 'ङमो ह्रस्वादचि ङमुण्नित्यम्' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ निम्नलिखितयोरेकस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या।** ५

१ शर्परे विसर्जनीयः

२ ओतो गार्ग्यस्य

**प्रश्न ८ कस्याप्येकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ 'इदुदुपधस्य चाप्रत्ययस्य' सूत्रस्य लघुशब्देन्दुशेखरानुसारं व्याख्या कार्या।

२ 'हलि सर्वेषाम्' सूत्रस्य यथाग्रन्थं व्याख्या कार्या।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ नागेशभट्टस्य पितुर्नाम किम्?

२ आम्नायसमाम्नायशब्दयोः कुत्र प्रयोगो भवति?

३ लण् सूत्रस्थेन इत्संज्ञकेन अकारेण कस्य प्रत्याहारस्य सिद्धिर्भवति?

४ अन्योन्याश्रयदोषनिवारणाय कस्य सूत्रस्य आवृत्तिः क्रियते?

५ 'टित्' आगमः आद्यावयवः अन्तावयवो वा भवति?

६ चतुर्विधेषु आन्तर्येषु किम् आन्तर्यं बलवद् भवति?

७ व्यक्तिपक्षे इक्-प्रत्याहारस्थाः वर्णाः कतिवर्णानां बोधकाः भवन्ति?

८ 'इको यणचि' इत्यत्र यथासंख्येन कस्मिन् पक्षे निर्वाहो भवितुं शक्नोति?

९ 'श्चुना' इत्यत्र का विभक्तिर्विद्यते?

१० ‘वेद्मि’ इत्यत्र दकारस्य स्थाने ‘यरोऽनुनासिकेऽनुनासिको वा’ सूत्रेण अनुनासिकः कथं न भवति?

११ ‘मोनुस्वारः’ सूत्रेण पदान्तस्य अथवा अपदान्तस्य मकारस्य स्थाने अनुस्वारो भवति?

१२ ‘हे मपरे वा’ सूत्रे मपरे इत्यत्र कः समासः?

१३ ‘शर्परे’ इत्यत्र कः समासः?

१४ ‘इणः षः’ सूत्रेण कस्य स्थाने षकारादेशो भवति?

१५ ‘प्रथमयोः पूर्वसवर्णः’ सूत्रेण किं कार्यं भवति?

********************